# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -शास्त्रीद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ८<br>(C.E.- 2.3.6. Old)<br>बृहज्जातकम् । | गुणा: - ७० |
| विषय: - फलितज्यौतिषम् | | |
| दिनाङ्क: - १२/१२/२०१८ | | समय: -०२.०० त: ०५.०० |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितेषु कयोश्चिद् द्वयो: व्याख्यां कुरुत । (१०)**

(१) जीवोऽङ्गिरां सुरगुरुर्वचसांपतीज्य: शुक्रो भृगुर्भृगुसुत: सितआस्फुजिच्चा ।
राहुस्तमोऽगुरुसुरश्च शिखीतिवेन्तु: पर्यायमन्यमुपलभ्यवदेच्च लोक्वत् ॥

(२) रक्तश्यामो भास्करो गौर इन्दुर्नात्युच्चाङ्गो रक्तगौरश्च वक्र: ।
दूर्वाश्यामो ज्ञो गुरुर्गौरगात्रश्श्यामश्शुक्रो भास्करि: कृष्णदेव: ॥

(३) बुधसूर्यसुतौ नपुंसकाख्यौ शशिशुक्रौ युवती नराश्च शेषा: ।
शिखिभूखपयोमरुद्गणानां वशिनो भूमिसुतादय: क्रमेण ॥

**प्रश्न: २ अधोलिखितयो: प्रश्नयो: कश्यचिदेकस्योपरि निबन्धं लिखत । (१०)**

(१) ग्रहयोनिप्रभेदाध्याय: (२) सूर्यादिनवग्रहाणां स्वरूप: ।

**द्वितीयान्विति:**

**प्रश्न: ३ अधोलिखितेषु कयोश्चिद् द्वयो: व्याख्यां कुरुत । (१०)**

(१) अशुभसहिते ग्रस्ते चन्द्रे कुजे निधनाश्रिते
जननिसुतयोर्मृत्युर्लग्ने रवौ तु सशस्त्रज: ।
उदयति रवौशीतांशौ वा त्रिकोणविनाशगै
निधनमशुभैवीर्योपेतै: शुभैर्नयुतेक्षिते ॥

(२) आयुर्दायं विष्णुगुप्तोऽपि चैवं देवस्वामी सिद्धसनेश्च चक्रे ।
दोषश्चेषां जायतेऽष्टावरिष्टं हित्वां नायुर्विंशते: स्यादधस्तात् ॥

(३) आयु: कृतं येन हि यत्तदेव कल्प्या दशा सा प्रबलस्य पूर्वम् ।
साम्ये बहूनां बहुवर्षदस्य तेषां च साम्ये प्रथमोदितस्य ॥

**प्रश्न: ४ अधोलिखितयो: प्रश्नयो: कश्यचिदेकस्याध्यायस्य सारांशं लिखतु । (१०)**

(१) अरिष्टाध्याय: (२) कर्मजीवाध्याय:

## तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां कुरुत । (१०)**

(१) यमे कुम्भेर्केऽजे गविशशिनितैरेव तनुगै-
नृयुक्सिंहालिस्थैः शशिजगुरुवक्रैर्नृपतयः ।
यमेन्दू तुङ्गोऽङ्गे सवितृशशिजौ षष्ठभवने
तुलाजैन्दुक्षेत्रैः ससितकुजजीवैश्च नरपौ ॥

(२) झषे सेन्दौ लग्ने घटमृगमृगेन्द्रेषु सहितौर्यमारार्केर्योऽभूत्सखलुमनुजः शास्तिवसुधाम् ।
अजे सारे मूर्तौ शशिगृहगते चामरगुरौ सुरेज्ये वा लग्ने धरणिपतिरन्योपिगुणवान् ॥

(३) ईर्ष्युर्विदेशनिरतोऽध्वरुचिश्चरज्ज्वां मानी धनी च मुशले बहुकृत्यशक्तः ।
व्यङ्गः स्थिराढ्यनिपुणो नलजः स्त्रगुत्थो भोगान्वितो भुजगजो बहुदुःखभाक्स्यात् ॥

**प्रश्नः ६ अधोलिखितयोः प्रश्नयोः कश्यचिदेकस्योपरि निबन्धं लिखत । (१०)**

(१) जीवशर्मामतानुसारेण राजयोगाः । (२) आश्रयदलयोगस्यपरिचयः।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोनिर्दिष्टेषु दशानाम् अतिलघूत्तरं यच्छत । (१०)**

(१) त्रिसंज्ञकग्रहाः के ?

(२) हेम्ना कस्य ग्रहस्य संज्ञा अस्ति ?

(३) गुरुः कस्मिन् राशौ कति अंशपर्यन्तम् उच्चः भवति ?

(४) द्विस्वभावसंज्ञकराशयः के ?

(५) संयोगाष्टवर्गफलं किम् ?

(६) लग्ने प्रथमद्रेष्काणस्य उदयः स्यात् तस्य फलं किम् ?

(७) हिमगौ शब्दस्यार्थः किम् ?

(८) भौमस्य शुभदशाफलं किम् ?

(९) सूर्यस्य शुभदशायां केन धनलाभः भवति ?

(१०) जन्मतः कतिवर्षपर्यन्तं बालारिष्टयोगः भवति ?

(११) महिषस्य परमायुः कति ?

(१२) सितः कस्य ग्रहस्य संज्ञा अस्ति ?

(१३) जन्मकालीनचन्द्रमा उपचयस्थाने संस्थितः तस्य फलं किम् ?

(१४) आश्रययोगस्य त्रयभेदाः सन्ति न वा ?

(१५) केमद्रुमयोगस्य फलं किम् ?

--००--